यावनालः ३ रक्तयावनालः ४ लोहितकुसुमरु-धान्यम् ५। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। विरेचकत्वम्। संग्राहित्वम्। वातशमनत्वम्। विदाहित्वम्। शोषकारित्वञ्च। इति राजनिर्घण्टः॥

तुवरिका, स्त्री, (तुवरः कषायरसोऽस्त्यस्याः। तुवर+ठन्।) सुराष्ट्रमृत्तिका। इत्यमरः। २। ४। १३१॥ (तुवर्य्येव। तुवरी+स्वार्थे कन् ह्रस्वश्च।) आढ़की। इति भरतः॥

तुवरी, स्त्री, (तुवर+षित्वात् ङीष्।) आढ़की। (यथा, वैद्यकरत्नमालायाम्।

"आढ़की तुवरी ज्ञेया॥"

वर्व्वरी तुलसी। तत्पर्य्यायाश्च यथा,—

"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सौराष्ट्रमृत्तिका। तत्पर्य्यायः। मृत्२ सौराष्ट्री३ मृत्स्ना ४ आढकः ५ मसी ६ सुराष्ट्रजा ७ मृत्तालकम् ८ काली ६ मृत्तिका १० सुरमृत्तिका ११ स्तुत्या १२ काची १३ सुजाता १४। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। कषायत्वम्। उष्णत्वम्। लेखनत्वम्। चक्षुष्यत्वम्। ग्राहित्वम्। छर्दिपित्तजृम्भानाशित्वञ्च। इति राजनिर्घण्टः॥

"तुवरी ग्राहिणी शीता लघ्वी कफविषास्रजित्। तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोठक्रमिप्रणुत्॥"

इति भावप्रकाशः॥

तुवरीशिम्बः, पुं, (तुवरी आढ़कीव शिम्बः। तुवरीसदृशत्वात् तथात्वम्। यद्वा, तुवर्य्या इव शिम्बा फलत्वक् यस्य।) चक्रमर्द्दकद्रुमः। इति शब्दचन्द्रिका॥

तुविः, स्त्री, तुम्बी। इति शब्दमाला॥ (बहुशब्दार्थः। इति निघण्टुः। ३। १॥ "तवतिर्वृद्ध्यर्थः सौत्रो धातुः। 'अच इः।' उणां ४। १३८। इति इः। 'इह्विहि बहुः।'" इति तट्टीका॥ "उरु। तुवि। पुरु। भूरि। शश्वत्। विश्वम्। परीणसा। व्यानशिः। शतम्। सहस्रम्। सलिलम्। कुविदिति द्वादश बहुनामानि॥" इति निघण्टुः। ३। १॥ यथा, ऋग्वेदे। ३। ३०।

"तुविकूर्म्मिर्ऋघावान्॥")

तुष, ष य श्री ञि तुष्टौ। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-अनिट्।) ष, अतुषत्। य, तुष्यति। श्री, तोष्टा। ञि, तुष्टोऽस्ति। इति दुर्गादासः॥

तुषः, पुं, (तुष+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) धान्यत्वक्। (यथा, प्रबोधचन्द्रोदये द्वितीयाङ्के।

"ब्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान् को नाम भोस्तुषकणोपचितान् हितार्थी॥")

विभीतकद्रुमः। इत्यमरः। २। ४। ५८॥

तुषग्रहः, पुं, (तुषेण गृह्यते इति। ग्रह+कर्म्मणि अप्।) अग्निः। इति त्रिकाण्डशेषः॥

तुषसारः, पुं, (तुषं सरति अनुसरतीति। सृ+अण्। तुषपुञ्जाभ्यन्तरे क्रमशः सञ्चारादस्य तथात्वम्।) अग्निः। इति शब्दमाला॥

तुषानलः, पुं, (तुषस्यानलः।) तुषाग्निः। तत्पर्य्यायः। कुकूलः २। इति हेमचन्द्रः। ४।१६७॥ (यथा, धूर्त्तसमागमे।

"तुषानलकणप्रायाश्च भूरेयवः॥")

तुषारः, पुं, (तुष्यत्यनेन शस्यादिरिति। तुष तुष्टौ+"तुषारादयश्च।" उणां ३। १३८। इति आरन् स च कित्।) हिमम्। (यथा, ऋतुसंहारे। ४। १।

"विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतः प्रिये!॥"

तौषारलक्षणगुणाश्च यथा,—

"अपि नद्याः समुद्रान्ते वह्निरापस्तदुद्भवाः। धूमावयवनिर्मुक्तास्तुषाराख्यास्तु ताः स्मृताः॥ अपि नद्याः समुद्रान्ते वह्निः नदीमारभ्य समुद्रपर्य्यन्ते वह्निरास्ते तदुद्भवाः। वह्निभवा धूमावयवनिर्मुक्ता धूमांशरहिताः। आपस्तुषाराख्याः। तुष इति लोके। तुषार इति च। अपथ्याः प्राणिनां प्रायः भूरुहाणान्तु न हिताः। तुषाराम्बु हिमं रूक्षं स्याद्वातलमपित्तलम्। कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगनुत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) देशभेदः। (तद्देशोद्भवे, पुं भूम्नि। यथा, मात्स्ये। १२०। ४५।

"तुषारान् वर्व्वरान् कारान् पह्लवान् पारदान् शकान्॥")

शीकरः। हिमभेदः। इति हेमचन्द्रः। ६।२१॥ (यथा, माघे। १। १५।

"न यावदेतावुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्व्वताविव॥")

कर्पूरभेदः। इति राजनिर्घण्टः॥ शीतले, त्रि। यथा, नैषधे। ३। ६३।

"अर्पां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा॥"

तुषितः, पुं, (तुष्यतीति। तुष तुष्टौ+बाहुलकात् कितच्। यद्वा, तुष+क्विप्। तुट् सन्तोषो ऽस्य जातः। तारकादित्वात् इतच्।) देवगणविशेषः। इत्यमरः। १। १। १०॥ ते षट्त्रिंशत् सङ्ख्याः। इति भरतः॥ केषाञ्चिन्मते द्वादश। ते तु मन्वन्तरभेदे विभिन्ननामानः। यथा,—

"प्राणापानसमानाश्च उदानो व्यान एव च। चक्षुः श्रोत्ररसा घ्राणस्पर्शौ बुद्धिर्म्मनस्तथा। द्वादशैते तु तुषिता देवाः स्वारोचिषेऽन्तरे॥"

इति सारसुन्दरी॥

(यथाच विष्णुपुराणे। १। १५। १२७—१३३।

"पूर्व्वमन्वन्तरे श्रेष्ठा द्वादशासन् सुरोत्तमाः। तुषिता नाम तेऽन्योन्यमूचुर्व्वैवस्वतेऽन्तरे॥ उपस्थितेऽतियशसश्चाक्षुषस्यान्तरे मनोः। समवायीकृताः सर्व्वे समागम्य परस्परम्॥ आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै। मन्वन्तरे प्रसूयामस्तन्नः श्रेयो भविष्यति॥ एवमुक्त्वा तु ते सर्व्वे चाक्षुषस्यान्तरे मनोः। मारीचात् कश्यपात् जातास्तेऽदित्या दक्षकन्यया। तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव च। अर्य्यमा चैव धाता च त्वष्टा पूषा तथैव च॥ विवस्वान् सविता चैव मित्रो वरुण एव च। अंशो भगश्चादितिजा आदित्या द्वादश स्मृताः॥ चाक्षुषस्यान्तरे पूर्व्वमासन् ये तुषिताः सुराः। वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः॥"

तथा च मत्स्यपुराणे। ६। ३—४।

"तुषिता नाम ये देवाश्चाक्षुषस्यान्तरे मनोः। वैवस्वतेऽन्तरे चैते आदित्या द्वादश स्मृताः॥ इन्द्रो धाता भगस्त्वष्टा मित्रोऽथ वरुणो यमः। विवस्वान् सविता पूषा अंशुमान् विष्णुरेव च॥"

तथा, भागवते। ४। १। ७।

"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिड़स्पतिः। इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट्। तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे॥")

तुषोत्थं, क्ली, (तुषादुत्तिष्ठतीति। उत्+स्था+कः।) तुषोदकम्। इति राजनिर्घण्टः॥

तुषोदकं, क्ली, (तुषादुत्थितमुदकम्।) काञ्जिकम्। इति हारावली। ११५॥ काञ्जिकभेदः। अस्य लक्षणं यथा,—

"तुषोदकं यवैरामैः सतुषैः शकलीकृतैः॥" यवैरुदकसहितैः सन्धानवर्गोक्तत्वात्॥

अस्य गुणाः। दीपनत्वम्। हृद्यत्वम्। पाण्डुक्रिमिगदवस्तिशूलनाशित्वम्। तीक्ष्णत्वम्। उष्णत्वम्। पाचनत्वम्। पित्तरक्तकारित्वञ्च। इति भावप्रकाशः॥ (यथाच।

"तुषोदकं वातहरं प्रभेदि
प्रकोपयेद्रक्तपित्तं सदैव।
विपाचनं स्यात्स्वरणं क्रमिघ्न-
मजीर्णहन्तृ कटुकं विपाके॥"

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये॥)

तुष्टः, त्रि, (तुष+कर्म्मणि क्तः।) तोषप्राप्तः। यथा, पुराणे।

"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्॥" (यथाच हितोपदेशे।

"सर्व्वा एवापदस्तस्य यस्य तुष्टं न मानसम्॥")

तुष्टिः, स्त्री, (तुष+भावे क्तिन्।) तोषः। (यथा, मनुः। २। ६। [दाम्।

"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥")

अधिगतार्थादन्यत्र तुच्छत्वबुद्धिः। इति चण्डीटीकायां नागोजीभट्टः॥ (सा च नवविधा। इति सांख्याचार्य्याः॥ तथाचोक्तम्।

"आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः। बाह्याविषयोपरमात् पञ्च नव तुष्टयोऽभिमताः॥"

इयमेव पुराणमते दक्षस्य प्रजापतेः कन्या धर्म्मस्य पत्नी च। यथा, मार्कण्डेये।५०।१६।२१।